https://www.mpboardonline.com

Serial Number ↓

Roll No. ..................................

Total No. of Questions : 19

Total No. of Printed Pages : 8

# P-906

## High School, Examination (Regular) - 2020

## संस्कृत (सामान्यम्)

## SANSKRIT (GENERAL)

Time : 3 Hours ] [ Maximum Marks : 100

https://www.mpboardonline.com

https://www.mpboardonline.com

निर्देश :

(i) सर्वे प्रश्नाः अनिवार्याः ।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1 उचितं विकल्पं चित्वा लिखत – 1×5=5

(क) 'तद् + शिवः' इत्यस्य पदस्य सन्धिः अस्ति –

(i) तद् + शिवः (ii) ततशिव

(iii) तच्छिवः (iv) तच्शिवः

(ख) 'पवनः' इत्यस्य पदस्य संधिविच्छेदः अस्ति –

(i) पो + अनः (ii) पौ + अनः

(iii) पव + अनः (iv) पव + नः

(ग) विसर्ग सन्धेः उदाहरणम् अस्ति –

(i) मनोहरः (ii) पावकः

(iii) उल्लासः (iv) जगदीशः

(घ) "वधूत्सवः" इत्यस्मिन् पदे सन्धिः अस्ति –

(i) अयादि सन्धिः (ii) दीर्घसन्धिः

(iii) गुण सन्धिः (iv) पूर्वरूप सन्धिः

(ङ) "मितं च सारं च वचोहि वाग्मिता" अत्र '<u>अव्ययम्</u>' अस्ति –

(i) सारम् (ii) हि

(iii) मितम् (iv) च



https://www.mpboardonline.com

https://www.mpboardonline.com

2 उचितं विकल्पं चित्वा लिखत – 1×5

(क) 'लम्बोदरः' एतस्मिन् पदे समासः अस्ति –

(i) कर्मधारयसमासः (ii) द्वंद्वसमासः

(iii) बहुब्रीहिसमासः (iv) द्विगुसमासः

(ख) 'यथाशक्तिः' इत्यस्य पदस्य समासविग्रहः अस्ति –

(i) शक्तेः अनुसारम् (ii) शक्तिं यथा

(iii) शक्तिः यथा (iv) शक्तिम् अनतिक्रम्य

(ग) 'रामलक्ष्मणौ' इत्यस्मिन् पदे समासः अस्ति –

(i) द्वन्द्वसमासः (ii) द्विगुसमासः

(iii) कर्मधारयसमासः (iv) तत्पुरुषसमासः

(घ) 'अनुगमनम्' इत्यस्मिन् पदे उपसर्गः अस्ति –

(i) अ (ii) गम्

(iii) अनु (iv) अनुगम्

(ङ) अधोलिखितेषु पदेषु उपसर्गः अस्ति –

(i) अत्र (ii) तत्र

(iii) एव (iv) परा

3 उचितं विकल्पं चित्वा लिखत – 1×5=

(क) 'पश्यन्ति' इत्यस्मिन पदे धातुः अस्ति –

(i) पश् (ii) दृश्

(iii) द्रश् (iv) पश्य

(ख) ''गमिष्यामि'' इत्यस्मिन् पदे लकारः अस्ति –

(i) लृट्लकारः (ii) लट्लकारः

(iii) विधिलकारः (iv) लोट्लकारः

(ग) 'लभते' इत्यस्मिन पदे पुरुषः अस्ति –

(i) उत्तमपुरुषः (ii) प्रथमपुरुषः

(iii) मध्यमपुरुषः (iv) महापुरुषः

(घ) 'अपिबन्' इत्यस्मिन पदे वचनमस्ति –

(i) एकवचनम् (ii) द्विवचनम्

(iii) बहुवचनम् (iv) अन्यवचनम्

(ङ) 'तत्र शिवालयः अस्ति' एतस्मिन वाक्ये अव्ययम् अस्ति –

(i) शिवः (ii) अस्ति

(iii) आलयः (iv) तत्र



https://www.mpboardonline.com

https://www.mpboardonline.com
https://www.mpboardonline.com

4 उचितं विकल्पं चित्वा लिखत – 1×5=5

(क) 'ङीप्' प्रत्ययस्य उदाहरणम् अस्ति –

(i) गुणिनी (ii) बाला

(iii) गुरुत्वम् (iv) कृतिः

(ख) 'पठन्' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) क्त्वा (ii) क्त

(iii) शतृ (iv) शानच्

(ग) 'ल्यप्' प्रत्ययस्य उदाहरणमस्ति –

(i) कृतवान् (ii) गतः

(iii) खादित्वा (iv) आदाय

(घ) 'गतः' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) तुमुन् (ii) क्त

(iii) ठक् (iv) क्तवतु

(ङ) ................ किल मनुष्याणां देवतानां च दैवतम् ।

(i) माता (ii) पिता

(iii) भ्राता (iv) साधुः

5 प्रदत्तैः शब्दैः रिक्तस्थापूर्तिं कुरुत (कोऽपि पञ्च) 1×5=5

(कदापि, यशः, साधकम्, पतिव्रतेति, शिष्टाः, ब्रहवः)

(i) भारतीयैकता ...........................संस्कृतम् ।

(ii) स्वकर्मणि प्रवर्तितुं ........................ नैवखिद्यते ।

(iii) गुरुकुले ........................ शिष्याः आसन् ।

(iv) महर्षि ...................... शरीरेण अमरः अस्ति ।

(v) पतिमात्रधर्मिणी ...................... नाम ।

(vi) परोपदेशवेलायां ...................... सर्वे भवन्ति वै ।

6 अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानां उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत – 2×3=6

(i) देवताः कुत्र रमन्ते ?

(ii) विदिशानगरी कस्मिन् प्रदेशे स्थिता विद्यते ?

(iii) यशोधरा तारस्वरेण सिद्धार्थं किम् उक्तवती ?

(iv) श्रीमाता संस्कृतविषये किं कथयति ?

(v) घटोत्कचः अन्ते किं कथयति ?



https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com

7 अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि निर्देशानुसारं लिखत –

(i) 'साधुः' चतुर्थीविभक्तिः एकवचन

(ii) 'युष्मद्' तृतीया विभक्तिः बहुवचनम्

(iii) रमा सप्तमी विभक्तिः बहुवचनम्

8 'भवते' अथवा राज्ञः इति पदस्य विभक्तिं वचनं च लिखत ।

9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत –

(क) छत्रसालस्य शौर्येण, राष्ट्रभक्त्या, उदारतया च प्रभावितो हिन्दीभाषायाः महाकविःभूषणः ''छत्रसालदशक'' इति वीररसनिबद्धां काव्यरचनाम् अकरोत् । छत्रसालः काव्यसाहित्यशास्त्रसम्मानार्थं भूषणमहाकवेः शिविकाम् अपि उत्तोलयत् । द्वयशीतिवर्षस्य अवस्थायां एकत्रिंशदुत्तरसप्तदशशततमे (१६३१) ख्रीस्ताब्दे ''मऊसहानिया इत्यस्य तालपरिसरे एषः क्षणभङ्गनिष्ठं शरीरम् अत्यजत् । अयं देशः जन्मभूमिसंरक्षकस्य महापराक्रमशालिनः छत्रसालस्य सदैव ऋणी अस्ति ।

(i) छत्रसालस्य राष्ट्रभक्त्या उदारतयाच कः प्रभावितोऽस्ति ?

(ii) ''छत्रसालदशक'' इति वीररसनिबद्धां काव्यरचनाम् कः अकरोत् ?

(iii) काव्यसाहित्यशास्त्रसम्मानार्थं कः भूषणमहाकवेः शिविकाम् उत्तोलयत् ?

(iv) छत्रसालः कदा क्षणभङ्गनिष्ठं शरीरम् अत्यजत् ?

(v) अयं देशः कस्य सदैव ऋणी अस्ति ?

(ख) कस्मिंश्चित् ग्रामे एकः प्राचीन विशालः च न्यग्रोधवृक्षः आसीत् । सः पशुपक्षिभ्यः बहुविधेभ्यः जीवः जन्तुभ्यः मनुष्येभ्यः अपि नित्यं बहूपकारकः आसीत् । पथिकाः तस्य वृक्षस्य छायायां पाथेयं भक्षयित्वा मार्गायासं परिहरन्ति स्म । पशवः छायार्थं वृक्षमिमम् आश्रयन्ति स्म । पक्षिणः तस्य शाखासु नीडानि विरच्य वसन्ति स्म । सर्पाश्च तत्रत्येषु वल्मीकेषु वासं कुर्वन्ति स्म । एवं स वृक्षः सर्वप्रियः सर्वहितकारी सर्वापेक्षितः च आसीत् ।

(i) न्यग्रोधवृक्षः कुत्र आसीत् ?

(ii) के मार्गायासं परिहरन्ति स्म ?

(iii) पशवः छायार्थम् कुत्र आश्रयन्ति स्म ?

(iv) पक्षिणः कुत्र वसन्ति स्म ?

(v) कः सर्वप्रियः सर्वहितः सर्वापेक्षितः च आसीत् ?



https://www.mpboardonline.com
https://www.mpboardonline.com

(ग) जनाः द्विधाः समयस्य दुरुपयोगं कुर्वन्ति व्यर्थयापनेन अकार्यकरणेन च । अनेके जनाः कार्यसम्पादने समर्था अपि निरर्थकं समयं यापयन्ति । इतो भ्रमन्ति ततो भ्रमन्ति अप्रयोजनं गृहे–गृहे अटन्ति । न ते स्वार्थाया एव किञ्चित् कार्यं कुर्वन्ति न वा परार्थाय एव । देवदुर्लभम् इदं मानवशरीरं लब्ध्वापि ये न अध्ययनं कुर्वन्ति न धर्मम् आचरन्ति न धनम् उपार्जयन्ति न वा मुक्तये प्रयासं कुर्वन्ति । तेषां जन्म निरर्थकं भवति तथा इयं कर्मभूमिः एतादृशानां निष्क्रियाणां भारं वोढुं नेच्छति ।

(i) जनाः समयस्य दुरुपयोगं कथं कुर्वन्ति ?

(ii) अनेके जनाः कस्मिन समर्थाः अपि निरर्थकं समयं यापयन्ति ?

(iii) मानवशरीरं कीदृशं अस्ति ?

(iv) इयं कर्मभूमिः केषां भारं वोढुं न इच्छति ?

(v) 'स्वार्थाय' इति पदस्य विपरीतार्थकं पदं लिखत ?

10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5×2=10

(क) छिन्नोऽपि चन्दनतरुर्न जहाति गन्धं,
वृद्धोऽपि वारणपतिर्न जहाति लीलाम् ।
यन्त्रार्पितो मधुरतां न जहाति चेक्षुः
दीनोऽपि न त्यजति शीलगुणान् कुलीनः ॥

(i) छिन्नोऽपि चन्दनतरुः किं न जहाति ?

(ii) लीलाम् कः न जहाति ?

(iii) यन्त्रार्पितो इक्षुः कां न जहाति ?

(iv) कः दीनोऽपि शीलगुणान् न त्यजति ?

(v) 'जहाति' इति पदस्य समानार्थी पदं लिखत ।

(ख) प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहिता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजनाः न परित्यजन्ति ॥

(i) कैः विघ्नभयेन कार्यं न प्रारभ्यते ?

(ii) मध्याः कदा विरमन्ति ?

(iii) के कार्यं प्रारभ्य न परित्यजन्ति ?

(iv) कैः प्रतिहन्यमानापि कार्यं न परित्यजन्ति ?

(v) पुनरपि इत्यस्य पदस्य संधिविच्छेदं कुरुत ।



https://www.mpboardonline.com

https://www.mpboardonline.com

(ग) मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः ।
पात्रं यत्सुखदुःखयोः सह भवेन्मित्रेण दुर्लभम् ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला-
स्ते सर्वत्रमिलन्ति तत्त्वनिकषग्रावातुतेषां विपत् ॥

(i) प्रीति रसायनं किम् अस्ति ?

(ii) किं दुर्लभम् ?

(iii) द्रव्याभिलाषाकुलाः सुहृदः कदा आगच्छन्ति ?

(iv) मित्रतायाः तत्त्वनिकषग्रावा किम् अस्ति ?

(v) 'मित्रम्' इति पदस्य पर्यायशब्दं लिखत ।

11 युग्ममेलनं कुरुत – (कोऽपि चत्वारः) 1×4=4

| (अ) | (आ) |
|---|---|
| (i) आदिकविः | (क) कुपितः जातः |
| (ii) कुबेरः | (ख) ब्रूयात् |
| (iii) कपिलमुनिः | (ग) वाल्मीकिना |
| (iv) घनाः | (घ) धनदेवः |
| (v) नातृतम् | (ङ) वर्षन्ति |

12 शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – (कोऽपि चत्वारः) 1×4=4

(i) मनः अपूर्वम् अस्ति ।

(ii) यशोधरा राहुलस्य माता आसीत् ।

(iii) अस्माभिः समयस्य सदुपयोगः कर्तव्यः ।

(iv) कुले च लोके च अनुजः श्रेष्ठः भवति ।

(v) वैदिककाले नारी शिक्षिता आसीत् ।

13 अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत – 1×4=4

(i) पूर्वस्मिनकाले विदिशानर्गयाः किं नाम आसीत ?

(ii) घनोपगूढं किम् अस्ति ?

(iii) का रूपं नाशयति ?

(iv) कदा दधिं न भुञ्जीत ?

(v) कुलं का रक्षितुम इच्छति ?

(vi) वर्षाकाले शिखिनः किं कुर्वन्ति ?



https://www.mpboardonline.com
https://www.mpboardonline.com
https://www.mpboardonline.com

https://www.mpboardonline.com

14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत । 4

15 स्वप्राचार्यस्यकृते पञ्चदिवसानां अवकाशार्थं एकं प्रार्थनापत्रं संस्कृतभाषायां लिखत । 4

अथवा

स्वमित्राय एकं आमन्त्रणपत्रं संस्कृतभाषायां लिखत ।

16 अधोलिखितेषु पञ्च अशुद्धकारक वाक्यानां शुद्धिं कुरुत – 1×5=5

(i) सौम्या मन्दिरः गच्छति ।

(ii) शिक्षकः सुधाखण्डम् लिखति ।

(iii) कृष्णः मोदकं रोचते ।

(iv) गङ्गा हिमालयस्य प्रभवति ।

(v) नावः तडागं अस्ति ।

(vi) राधा कृष्णस्य सह गच्छति ।

17 अधोलिखित वाक्यानां कथानुसारेण क्रम–संयोजनं कुरुत – 1×5=5

(i) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत् ।

(ii) गङ्गातीरे मार्कण्डेयः नामकश्चन मुनिः वसति स्म ।

(iii) किञ्चिदग्रेगतः वासुदेवः कञ्चित् देवालयम् अपश्यत् ।

(iv) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान् ।

(v) वासुदेवः तस्यप्रियशिष्यः आसीत् ।

18 अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5

सतां सज्जनानां, सङ्गतिः सम्पर्कः संसर्गो वा सत्सङ्गतिः इति कथ्यते । वस्तुतः सत्सङ्गात एव मानवः समुन्नतो भवति । सज्जनानां संसर्गेण जनः सज्जनः भवति, दुर्जनानां संसर्गेण च दुर्जनः भवति । स्थाने एवोक्तं "संसर्गजा दोषगुणा भवन्ति" इति । अतः स्व समुन्नतिं इच्छता जनेन सर्वदा सतामेव सङ्गतिर्निर्धया ।

(i) अस्य गद्यांशस्य शीर्षक लिखत ।

(ii) केन जनः सज्जनः भवति ?

(iii) स्व समुन्नतिम् इच्छता जनेन किं करणीयम् ?

(iv) 'भवन्ति' पदे का धातुः अस्ति ?

(v) 'दुर्जनः' शब्दस्य विलोम शब्दं लिखत् ।



https://www.mpboardonline.com

19 अधोलिखितेषु विषयेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत –

(i) अनुशासनम्

(ii) मम दिनचर्या

(iii) संस्कृतभाषायाः महत्त्वम्

(iv) अस्माकं देशः

https://www.mpboardonline.com

https://www.mpboardonline.com

https://www.mpboardonline.com
Whatsapp @ 9300930012
Send your old paper & get 10/-
अपने पुराने पेपर्स भेजे और 10 रुपये पायें,
Paytm or Google Pay से